॥ अणुभाष्यम् ॥

॥ प्रथमोऽध्यायः ॥

नारायणं गुणैः सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥ १ ॥

विष्णुरेव विजिज्ञास्यः सर्वकर्ताऽऽगमोदितः ।
समन्वयादीक्षतेश्च पूर्णानंदोऽंतरः खवत् ॥ २ ॥

प्रणेता ज्योतिरित्याद्यैः प्रसिद्धैरन्यवस्तुषु ।
उच्यते विष्णुरेवैकः सर्वैः सर्वगुणत्वतः ॥ ३ ॥

सर्वगोऽत्ता नियंता च दृश्यत्वाद्युज्झितः सदा ।
विश्वजीवांतरत्वाद्यैर्लिंगैः सर्वैर्युतः स हि ॥ ४ ॥

सर्वाश्रयः पूर्णगुणः सोऽक्षरः सन् हृदब्जगः ।
सूर्यादिभासकः प्राणप्रेरको दैवतैरपि ॥ ५ ॥

ज्ञेयो न वेदैः शूद्राद्यैः कंपकोऽन्यश्च जीवतः ।
पतित्वादिगुणैर्युक्तस्तदन्यत्र च वाचकैः ॥ ६ ॥

मुख्यतः सर्वशब्दैश्च वाच्य ऎकॊ जनार्दनः ।
अव्यक्तः कर्मवाक्यैश्च वाच्य ऎकॊऽमितात्मकः ॥ ७ ॥

अवांतरं कारणं च प्रकृतिः शून्यमॆव च ।
इत्याद्यन्यत्रनियतैरपि मुख्यतयॊदितः ।
शब्दैरतॊऽनंतगुणॊ यच्छब्दा यॊगवृत्तयः ॥ ८ ॥

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितॆ ब्रह्मसूत्राणुभाष्यॆ प्रथमॊऽध्यायः ॥

www.yousigma.com